स्वधानामकस्वधाशब्दस्यापि पितृदाने विनियोग इति बोध्यम् ।

**स्वधाप्रिय** पु० स्वधाभिर्नां प्रियः शाक० ।१कृष्णतिले शब्दर० २स्वधोपलक्षितश्राद्धादिप्रिये पित्रादौ च । स्वधा प्रिया यस्य ।३पितृलोके स्वधाशब्दे मूलं दृश्यम् । [गणे २देवे च

**स्वधाभुज्** स्वधेत्यनेन त्यक्तद्रव्यं भुङ्क्ते भुज–क्विप् । १पितृ-

**स्वधि(ती)ति** स्त्री स्वेन धीयते धा–क्तिच् वा ङीप् । कुठारे परश्वधे अमरः पृषो० । स्वधितिरप्यत्र ।

**स्वन** शब्दे भ्वा० पर० अक० सेट् । स्वनति अस्वनीत् अस्वानीत् । फणा०स्वेनतुः सस्वनतुः । अयं भूषणे वा घटा० (स्वा)स्वनयति । [स्वनत्–त ।

**स्वन** ध्वाने अद० चु० उभ० अक० सेट् । स्वनयति–ते अस-

**स्वन** पु० स्वन+अप् । शब्दे अमरः ।

**स्वनि** पु० स्वन+इन् । शब्दे हेमच० ।

**स्वनित** त्रि० स्वन–कर्त्तरि–क्त । १शब्दिते अमरः । भावे क्त । २शब्दे ३मेघगर्जिते च न० हेमच० ।

**स्वनिताह्वय** पु० स्वनितमाह्वयते आ+ह्वे श । तण्डुलीयशाके राजनि० । [स्त्रियां ङीष् ।

**स्वनोत्साह** पुंस्त्री० स्वने उत्साहो यस्य । गण्डके शब्दर०

**स्वपन** न० स्वप–ल्युट् । १शयने २निद्रायाञ्च शब्दर० ।

**स्वपिण्डा** स्त्री स्वेनैव पिण्डः पिण्डाकारोऽस्त्यस्याः अच् । पिण्डखर्जूर्य्याम् राजनि० ।

**स्वप्न** पु० स्वप–भावे नन् ।१निद्रायाम् अमरः २शयने ३मानसिकज्ञानभेदे ४दर्शने च मेदि० आर्षे न० । स्वप्नदृष्टपदार्थस्य मायामात्रत्वं शा० सू० भाष्ययोर्व्यवस्थापितं यथा "सन्ध्ये सृष्टिराह हि" सू० ।

"अतिक्रान्ते पादे पञ्चाग्निविद्यामुदाहृत्य जीवस्य संसारगतिप्रभेदः प्रपञ्चितः, इदानीं तस्यैवावस्थाभेदः प्रपञ्च्यते । इदमामनन्ति "स यत्र प्रस्वपिति" इत्युपक्रम्य "न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते" इत्यादि । तत्र संशयः किं प्रबोध इव स्वप्नेऽपि पारमार्थिकी सृष्टिराहोस्विन्मायामयीति । तत्र तावत् प्रतिपद्यते । सन्ध्ये सृष्टिरिति । सन्ध्यमिति स्वप्नस्थानमाचष्टे वेदे प्रयोगदर्शनात् "सन्ध्यं तृतीयं स्वप्नस्थानम्" इति । द्वयोर्लोकस्थानयोः प्रबोधसम्प्रसादस्थानयोर्वा सन्धौ भवतीति सन्ध्यं तस्मिन् सन्ध्ये स्थाने तथ्यरूपैव सृष्टिर्भवितुमर्हति । कुतः, यतः प्रमाणभूता श्रुतिरेवमाह "अथ रथान् रथयोगान् पथः सृजते" इत्यादि । स हि कर्त्तेति चोपसंहारादेवमेवावगम्यते" भा० । "निर्मातारं चैके पुत्रादयश्च" । सू० "अपि चैके शाखिनोऽस्मिन्नेव सन्ध्ये स्थाने कामानां निर्मातारमात्मानमामनन्ति "य एष सुप्तेषु जागर्त्ति कामं कामं पुरुषो निर्मिमाणः" इति । पुत्रादयस्तु तत्र कामा अभिप्रेयन्ते काम्यन्त इति । ननु कामशब्देनेच्छाविशेषा एवोच्येरन्, न, "शतायुषः पुत्रपौत्रान् वृणीष्व" इति प्रकृत्य "अन्ते कामानान्त्वा कामभाजं करोमि" इति प्रकृतेषु तत्र पुत्रादिषु कामशब्दस्य प्रयुक्तत्वात् । प्राज्ञं चैनं निर्मातारं प्रकरणवाक्यशेषाभ्यां प्रतीमः । प्राज्ञस्य हीदं प्रकरणम् "अन्यत्र धर्मादन्यत्राधर्मात्" इत्यादि । तद्विषय एव च वाक्यशेषोऽपि–"तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते । तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन" । इति प्राज्ञकर्त्तृका च सृष्टिस्तथ्यरूपा समधिगता यथा जागरिताश्रया तथा स्वप्नाश्रयापि सृष्टिर्भवितुमर्हति । तथा च श्रुतिः "अथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत् पश्यति तानि सुप्तः" इति स्वप्नजागरितयोः समानन्यायतां श्रावयति । तस्मात् तथ्यरूपैव सन्ध्ये सृष्टिरित्येवं प्राप्ते प्रत्याह । "मायामात्रन्तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" सू० । "तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति यदुक्तं सन्ध्ये सृष्टिः पारमार्थिकीति । मायामय्येव सन्ध्ये सृष्टिर्न परमार्थतोऽप्यस्ति । कुतः कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् । न हि कार्त्स्न्येन परमार्थवस्तुधर्मेणाभिव्यक्तस्वरूपः स्वप्नः । किं पुनरत्र कार्त्स्न्यमभिप्रेतं, देशकालनिमित्तसम्पत्तिरबाधश्च । न हि परमार्थवस्तुविषयाणि देशकालनिमित्तानि अबाधश्च स्वप्ने रथादीनामुचितो देशः सम्भवति, न तावत् संवृते देहदेशे रथादयोऽवकाशं लभेरन् । स्यादेतत्, बहिर्देहात् स्वप्नं द्रक्ष्यति देशान्तरितद्रव्यग्रहणात् । दर्शयति च श्रुतिः बहिर्देहात् स्वप्नं "बहिःकुलायादमृतश्चरित्वा स ईयते अमृतो यत्र कामम्" इति । स्थितिगतिप्रत्ययभेदश्च नानिष्क्रान्ते जन्तौ सामञ्जस्यमश्नुवीतेति । नेत्युच्यते, न हि सुप्तस्य जन्तोः क्षणमात्रेण योजनशतान्तरितं देशं पर्य्येतुं विपर्य्येतुञ्च ततः सामर्थ्यं सम्भाव्यते । क्वचिच्च प्रत्यागमनवर्जितं स्वप्नं श्रावयति "कुरुष्वहं शय्यायां शयानो निद्रयाभिप्लुतः स्वप्ने पञ्चालानभिगतश्चास्मिन् प्रतिबुद्धश्च" इति । देहा-